# Shri Ramakrishna mahimodgitih

# શ્રીરામકૃષ્ણમહિમોદ્ગીતિઃ

## Document Information

Text title : Shri Ramakrishna mahimodgitih

File name : rAmakRRiShNamahimodgItiH.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણમહિમોદ્ગીતિઃ

પ્રાધ્યાપક - પાઁચુગોપાલ બન્ધોપાધ્યાયેતિ - પ્રચલન્નામધેય-
શ્રીજગન્નાથદેવ શર્મણા વિરચિતા ।

વન્દે પુરાણપુરુષં કરુણાવતારં
  પ્રેમાનુરાગ-ભરિતાક્ષિ-સરોજ-યુગ્મમ્ ।
ભક્તાલિલીઢ઼-યુગભાવ-કદમ્બ-સારં
  શ્રીરામકૃષ્ણમખિલાઘ-કુરઙ્ગ-ભઙ્ગમ્ ॥ ૧॥

અભિરામ-નરાકાર ! જય જય ગદાધર ! ।
પરિહૃતધરાભાર ! જય જય નમોઽસ્તુતે ॥ ૨॥

અભિનવ-સમાચાર ! લીલામય-તનુ-ધર ! ।
નિખિલ-સદ્ગુણાધાર । જય જય નમોઽસ્તુતે ॥ ૩॥

અતિક્રાન્ત-કુલાચાર ! મધુર-મોહન-સ્વર ! ।
“ધની”-ભિક્ષા-કણાહાર ! જય જય નમોઽસ્તુતે ॥ ૪॥

અનુપમ રસાગાર ! વિમલ પ્રતિભા-ધર ! ।
પિતૃ-પ્રસૂ-મનશ્ચૌર ! જય જય નમોઽસ્તુતે ॥ ૫॥

ત્રેતાયાં યશ્ચ રામોહિ શ્રીકૃષ્ણો દ્વાપરે સ્મૃતઃ ।
તસ્મૈ ત્વભેદ-રૂપાય રામકૃષ્ણાય તે નમઃ ॥ ૬॥

જગન્માતૃ-ગત-પ્રાણ-દક્ષિણેશ્વર-વાસિને ।
સર્વતન્ત્ર-સુસિદ્ધાય-રામકૃષ્ણાય તે નમઃ ॥ ૭॥

નાનામત-સુસિદ્ધાય સમન્વય-વિધાયિને ।
અનુલોમ-વિલોમજ્ઞ-મહાવિજ્ઞાનિને નમઃ ॥ ૮॥

કામિની-કાઞ્ચન-ત્યાગિ-ન્યક્કૃત-સિદ્ધિ-સમ્પદે ।
વિશ્વમાતૃત્વ-સમ્બુદ્ધ-જાયાઙ્ઘ્રિ પૂજકાય ચ ॥ ૯॥

વિશુદ્ધ માતૃભાવાય સિદ્ધિ કપાટ-મોચિને ।
નમસ્તે દેવદેવાય કરુણાઘન-મૂર્તયે ॥ ૧૦॥

"ન તુ જીવે દયા ભાવઃ સેવૈવ શિવ-બોધતઃ ।"
ઇતિ શ્રેષ્ઠ-યુગાદર્શોદ્ઘોષકાય નમોઽસ્તુતે ॥ ૧૧॥

પ્રેમૈક-સિન્ધવે તુભ્યં જ્ઞાન-વૈરાગ્ય-મૂર્તયે ।
ધર્મ-ગ્લાનિ-વિનાશાય ચૈતન્ય-દાયિને નમઃ ॥ ૧૨॥

આચણ્ડાલ-વૃષ્ઠ-પ્રેમ્ણઃ પાપ-તાપ-નિવારિણે ।
પાતકી-પાપ-સઙ્કૃષ્ટેઽર્ગલવ્યાધિ-ભુજે નમઃ ॥ ૧૩॥

દ્વિજાન્ત્યજ-સમ-જ્ઞાન-પતિત-પાવનાય વૈ ।
સર્વપાપ-પ્રહાણાય જગદ્ગુરો ! નમોઽસ્તુતે ॥ ૧૪॥

અસાધ્ય-વ્યાધિ-સઙ્ક્રાન્તેઃ કાશીપુર-નિવાસિને ।
પ્રેષ્ઠ-શિષ્ય-નરેન્દ્રાય સર્વસ્વ-દાયિને નમઃ ॥ ૧૫॥

નિર્વિકલ્પ પ્રલીનાય ચૈતન્યોદ્બોધકાય ચ ।
પ્રશાન્તિ-કરુણા-પ્રેમ-મણ્ડિતાસ્યાય તે નમઃ ॥ ૧૬॥

સર્વધર્મ સ્વરૂપાય દેશિકેન્દ્રાય સૂરયે ।
મહાભાવ પ્રતિષ્ઠાય બ્રહ્મિષ્ઠાયાપિ તે નમઃ ॥ ૧૭॥

"ન જાતઃપ્રત્યયોઽદ્યાપિ ખલુ તે યો હિ રામો નુ ।
શ્રીકૃષ્ણો યશ્ચ ભૂતલે સોઽત્ર રામકૃષ્ણોઽધુના" ॥ ૧૮॥

લીલા-સંવૃતિ બેલાયાં સ્ફુટમિતિ નરેન્દ્રાય ।
સ્વરૂપોન્મોચિને તુભ્યં ત્રિકાલદર્શિને નમઃ ॥ ૧૯॥

ઊરીકૃત્ય નૈવ યો ગુરુ-જનક-મતિં કર્તૃભાવં નિકૃષ્ટં
પ્રાભૂત્ વિશ્વે વરિષ્ઠોઽતુલ-મનુજવરઃ સઙ્ઘ-દેવો ગરિષ્ઠઃ ।
ઈશાનસ્તારકો યોઽખિલ કલુષહરસ્ત્વાશ્રયો ભક્તિદાતા
તસ્મૈ હે રામકૃષ્ણ પ્રભુ ગુણધરતે ઝઙ્કૃતાઃ સાધુવાદાઃ ॥ ૨૦॥

નમસ્તુભ્યં વિરાડ્ રૂપ ! હિરણ્યગર્ભ હે ! નમઃ ।
ઈશ્વર હે ! નમસ્તુભ્યં તુરીય બ્રહ્મતે ! નમઃ ॥ ૨૧॥

જગજ્જાલબદ્ધઃ કલિસ્તબ્ધબોધો હતાશા વિમૂઢશ્ચ નૂનં મનુષ્યઃ ।
મૃગેન્દ્રો બહિઃ પિઞ્જરાત્ યાતિ યાદૃક્

તથા રામકૃષ્ણ પ્રસાદાદ્ધિ તસ્માત્ ॥ ૨૨॥

ઇતિ “શ્રીશ્રીરામકૃષ્ણમહિમોદ્ગીતિઃ” સમાપ્તા ॥

Proofread by Aruna Narayanan

*Shri Ramakrishna mahimodgitih*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*